# अथ विष्णुस्तुतिः

मुरारातेविष्णो हरमुखसुराराध्य भवतो
धरायां नास्त्यन्यो भवजलधिपारं गमयितुम् ।
दुराचारान् वाऽस्मानव गुरुवरानुग्रहबलात्
जरादूराधारामयहर निरालम्बनदय ॥१॥

अहं सक्तः पोते भवजलधिपोते त्वयि न वै
रतः पाके लक्ष्मीरमण तव पाके न हि रतः ।
तथाऽप्याचार्याणां सुखपदजुषां सन्मतरत-
स्वृतज्ञानार्यस्याविनयमपिनेयं त्वमव माम् ॥२॥

रमा कामारातिः कमलभवनः श्यामलतनो
यदाऽशक्ताः स्तोतुं जडमतिरहं क्व व्रजपते ।
तथाऽप्यर्घ्यं सिन्धोरिव तव भवत्वीश करुणा-
समुद्रैषा वाणी तव हृदयतोषाय सततम् ॥३॥

न जाने श्रीजाने किमपि सवने नापि नमने
रतः स्नाने दाने रघुकुलजने हृन्नियमने ।
धने याने गानेऽवनिपसभमाने च भवने
रतो हीने स्थानेऽवसि तदपि मानैककरुण ॥४॥

जना दीना नानावृजिनशमनाम्नायमनना-
द्विना वीनासीनाधिगतिरिह नासौख्यमथन ।
धनाधीना हीना भुवनभवनात्रेयवदना
घनानूना ज्ञानापहतमधुनायातमधुना ॥५॥

नरान् स्तुत्वा नीचानुदरभरणासक्तहृदयो
दयोदाराधाराऽमरवरनुत त्वत्पदयुगम् ।
न चावन्दे विष्णो तदपि भववारीश पतितं
पते माया मायावरणहरणाद्रक्ष नृहरे ॥६॥

हरे नानायोनिप्रभवननिदानान्यनुदिनं
घनाभैनांसि श्रीवनजनयनानेकगुणक ।
क्षमस्व क्षेमं मे सश दिश दशस्यन्दनजने
शशाङ्कास्य त्वं मे भवजनिततापं परिहर ॥७॥

हरे राजानोऽमी स्वभटतनयान् दोषनिलयान्
गुणैर्हीनान् सौवा इति मतियुताः पान्ति सदयाः ।
मदार्या आबाल्यं तव भजनसंसक्तहृदया
जहुर्निद्रां तेषां रघुवर विनेयोऽस्म्यवतु माम् ॥८॥

वयं प्रातःस्नानं रघुपनमनं सुप्रवचनं
गुरुध्यानं पद्मारमणनमनं नापि मननम् ।
अकाष्मीलं श्रीलं दशवदनकालं गततुलं
रमालोलं यामः शरणममलं वीतशमलम् ॥९॥

गुरुस्वान्तस्थान्यागणितगुणमाणिक्यनिकर-
च्छविव्रातोपेतामितसुख मखाम्नेडित हरे ।
नमः श्रीमन् व्यास स्वजनदुरिताहार्यविधुर
त्वदीये वायौ मे भवति भवताद्भक्तिरतुला ॥१०॥

रमाराम श्रीमन्नमलकमलासोमनत भो
नमामो हेमाभामितमहिम हे माधव न ते ।

समो भूमा भूमौ शमदमविमानादिनियम-
श्रमस्तोमप्रेमन्नव मलहिमानीमिहिर भोः ॥११॥

विरागासक्तिस्ते वयमज पुरागाररमणी
धरागानासक्ता न च पदपरागादरयुताः ।
पुरागारात्यादिप्रणुत वितरागाधमहिमन्
सुरागावा भूतीः सुमतिमुखरा गाधिजसख ॥१२॥

घनोपमतनो मम त्वयि मनो न सक्तं जनो
विनिन्दति धनोन्मदो यदि तनोषि न त्वं दयाम् ।
स्वनोगतमनोहरागम वनोद्भवाभं पदं
विनोत्तम गतिश्च का जगदनोद्धरैनोगणात् ॥१३॥

मनागपि विना हरे तव दयां न शं कस्यचित्
धनाधिपजनार्जने रतिमतां कथं सा भवेत् ।
घनान् सुपवना इव त्वमज कल्मषं दूरतो
विनाश्य वसनाशनादरमवेश नारायण ॥१४॥

हरे तव पदस्मृतिं सकलजन्मदोषापहां
वदन्ति निगमा रमारमण मामकाघं कुतः ।
न हन्ति न हि सन्ति किं मयि गुरुप्रसादादयो
दयोदधिवयोधिपासन भियोऽरितोऽपाकुरु ॥१५॥

हरे भरतसोदरे दयितसागरे श्रीधरे
मनश्चरतु भासुरे सकलदोषदूरेऽजरे ।
वरे दनुजभीकरे बहुगुणाकरे मध्वरे
मयीश परमादरे तनु दयां भवेनातुरे ॥१६॥

जगज्जनकजानकीकमनभीमसोमाऽदिमा-
ऽमरव्रजसुपूजित वृजिननाशन श्रीश नः ।
अव प्रवणवर्गवित्तव निसर्गभक्तानलं
सुभार्गवतनो तपोहरण भर्गजप्याभिध ॥१७॥

द्विपाधिपमपाः पुराऽजित विपासनोऽतित्वरः
कृपापरवशस्तथा द्रुपदजामुपासद् व्रजम् ।
क्षपाचरविपाटने पटुमपास्तदोषं वयं
ह्यपावृतमुपास्महे विषयलोलुपानप्यव ॥१८॥

मया किमपि साधनं न कृतमीश वित्तार्जने
सदारतिमता रमारमण सत्यधीसन्नत ।
दयालुरिति वैदिकी प्रथितिरस्ति या तां हरे
न नाशय घनाशय प्रशमयामयं भौतिकम् ॥१९॥

नुतिं हि करवाम नो दिशतु दीदिविं वामनो
रघूत्तम न वा मनो भवतु चञ्चलं वा मनो ।
हरे दितिजवाम नो लवनकौशलावामनो
न वामनि भवामनो हर शरीरिका वामनो ॥२०॥

अये पुरुदयेऽव्यये सुखमये श्रिये संश्रये
धिये भुवनजालये शुभजयेभ्यताप्राप्तये ।
वयेऽरणमनामये रचितभक्तलोकाभये
मयेप्सितमदश्शये तव न किं मुरारिप्रिये ॥२१॥

विरुद्धगतिरीशिता महदणुत्वयोराश्रयः
कथं त्विति ममाभवत् प्रतिदिनं महाद्वापरः ।

हिरण्यकशिपोःसुते नरकनन्दने यद्दयां
विधाय ऋतधीसुते मयि तनोषि नो तद्गतः ॥२२॥

अजामिलगजाधिपद्रुपदजास्त्वया पालिता-
स्त्वहं तव भटो न किं किमवने गतं पाटवम् ।
गुणा मयि नहीति वा रघुपते दयां नाचरः
शिलाकलुषनाशनेऽकृत किलाबलासादनम् ॥२३॥

महाभिषगभूत् पुरा जलनिधिर्विधेराज्ञया
निजापकणपातनादपघने तथा शन्तनुः ।
कुतोऽलसमतिर्वृथा भव भवामये त्वं महा-
भिषग्वपुषि मे क्षिपंस्तव हि शाम्बरं शं तनुः ॥२४॥

निन्दावन्दारुलोकानवनमुरुदय तद्विधानामुदारा
मन्दा नन्दा च भर्गप्रभृतिसुरवराराध्यपादारविन्द ।
मन्दावृन्दावनक्ष्माविहरण करुणालेशतः पाहि जातं
नन्दा वन्दामहे त्वां गुरुवरहृदयक्षीरजस्थं मुकुन्दम् ॥२५॥

सीते मातेव पोते गुणलवरहिते मय्यविद्याविभूते
पोते देवैः परीते कुरु गुणभरिते काऽनुकम्पा समाते ।
ख्याते वातेन गीते परिहृतदुरिते सन्नते भूमिजाते
भक्तिं लक्ष्मीनिकेते गुरुहृदयगते देहि मे त्वत्समेते ॥२६॥

वायो श्रेयोऽपि रायो हरिरिति सुधियो देहि भूयो नमस्ते
प्रेयो हेयो हि कायो न च बलनिचयो भूरयो नारयो वै ।
प्रेयो ज्यायोऽनपायोर्जितसुजनदयोदार योगिप्रियोमा
ध्येयोपेयोतदेयोनृपसभविजयो नामदो हेऽब्जयोने ॥२७॥

सेवे देवेश भावे मम वस गुरवे ते नमःश्रीशभावे
सृत्यब्धेभूर्यमीवे द्युतिविजितरवे स्याद्दयाऽतीवजीवे ।
सौवे हे वेदरावेडितचरण भवे मग्नमुद्धृत्य दासं
शैवे दैवे त्वयीने रतिमतिविभवे मामवेष्टप्रदातः ॥२८॥

अधुना स धुनातु भूतबन्धं मधुनाशी मधुना धिया च पूर्णः।
मधुना विधुना समानवक्त्रो विधिनाथो विधिना समर्चितो मे ॥

स्मृतिस्त्वनुगता हरेर्मतित एव नष्टा भवे-
न्नुतिर्न रचिता मया न च नतिर्न वापि स्मृतिः ।
मतिर्मम न विद्यते यतिपते भवन्तं विना
श्रुतिप्रभृतिसाधनैः श्रुतिततीडितं दर्शय ॥३०॥

हरे सुरेश रेखया नतं नुतं च तं ततम् ।
भजे निजे गजे शिवक्रिया दया मया दरे ॥३१॥

हरे स्मृतिर्न चास्ति चेत् कथं ममागसां स्मृतिः ।
कृतं स्मरेति च त्रयी यदाह वेत्सि तन्न किम् ॥३२॥

हरे तव प्रियात्मजस्नुषानपात्तदात्मजाः ।
मया दयार्थमादृता वदन्ति किं न तेऽन्तिकम् ॥३३॥

तात श्रीराममूर्तीरमलकमलतोऽभ्यर्च्य मातुर्न शिष्टं
कञ्जं कञ्जालयाया इति यदमनिषि प्राददाः कञ्जमेकम् ।
तत्किं जायादयातः किमु मयि दयया नैव जानेऽहमज्ञः
स्वामिन् श्रीसत्यबोधव्रतिवरहृदयाम्भोजवासिन् वद त्वम् ॥३४॥

पुरा पुरारिपालने त्वरा मुरारिणा कृता ।
धरामरावने न किं पटुः परापराजितः ॥३५॥

इन्दिरा सत्यबोधार्यहृदयाम्भोजमन्दिरा ।
इन्दिदिरान् स्वपादाब्जेऽव्यान्नोभाजितचन्दिरा ॥३६॥

प्रिया यस्य माया क्रियाम्नायमेया
भिया यस्य माया विनष्टाऽन्यदीया ।
नयात्तं जयार्थं दयालुं हयास्यं
भयार्ताश्च यामः श्रियायद्य विष्णुम् ॥३७॥

नेता यः कमलालयादिजगतो माता यथा सर्वतः
पाता सत्यमतिव्रतीशहृदयाब्जातालयो यश्च तम् ।
भूताधीशशचीपतिप्रभृतिभिः पीतामृतैरादृतं
धूताशेषभयं नमाम सततं सीतापतिं राघवम् ॥३८॥

घर्मसूक्तव्याकरणधर्मप्रीतो रघूत्तमः
कर्मपौर्वं पराकृत्य शर्म मौक्तं प्रयच्छतु ॥३९॥

समुद्रसूत्रव्याख्यानसमुद्-रघुपतिर्हि नः
समुद्रजस्कान्सुक्षीरसमुद्रवसतीन्क्रियात् ॥४०॥

कमला महिला सुतोऽब्जजातो ननु पौत्रः पुरशात्रवोऽन्यलेखाः ।
तव यस्य भटा नमत्किरीटाः पुरुटाभाम्बर संस्तुवीत कस्त्वाम् ॥

न मे वपुषि पाटवं न नयने न शब्दग्रहे
सिता मम तनूरुहाः प्रशिथिला द्विजानां ततिः ।
तथापि विषयेऽशुभे चरति मे मनः श्रीहरे
त्वदीयहृदयं विना नहि निदानमस्त्यत्र वै ॥४२॥

आम्नायोद्धार भूभृद्धर धरणिधर श्रीहिरण्यासुरारे
खर्वाङ्ग क्षत्रगोत्रापह दशरथभूः कंसशत्रो विनेत्र ।

अर्विन् शर्वेशपूर्वामरगणविनुतानन्तरूपक्रियावन्
व्यास श्रीसत्यबोधाह्वयगुरुहृदयावास विष्णो नमस्ते ॥४३॥

मध्वार्यमीडे यो मुक्तेरध्वानं मामदर्शयत् ।
विध्वाननमुपन्याससुध्वानजितवादिनम् ॥४४॥

भागिरथिगुणान्वक्तुं भोगीशो बहुलाननः ।
वागीशोऽपि क्षमो नैव हे गीर्वाणतरङ्गिणि ॥४५॥

अङ्गीकृतानङ्गरिपूत्तमाङ्गां सङ्गीतचर्यामघराशिभङ्गाम् ।
भङ्गत्रयदूरीकृतसत्तुरङ्गां गङ्गामहं नौमि लसत्तरङ्गाम् ॥४६॥

भेरी गौरीशरामस्य नारीकृतशिलस्य या ।
वैरी न सहते तां तं दूरीकुरु तव स्थलात् ॥४७॥

विष्णुप्रीत्यै चरको नैव किं तु व्यर्थं नीचान्करकस्सन्नुपासे ।
आगःपूगान्मामकाद्दुःखहेतोः हेयात्पायाच्छ्रीनिवासाख्यदैवम् ॥

॥ इति श्रीसत्यसन्धतीर्थविरचिता विष्णुस्तुतिः ॥